वृत्तान्तं अवर्णयत् (१)। तच्छ्रुत्वा पुत्रोऽवोचत्, "यद्यत्र चतुरङ्ग-बलं ददाति तद् ग्रहीष्यामि, यत्र सुखेन राज्यं कर्तुं शक्यते"। पित्रोक्तं, "बुद्धिमता राज्यं न प्रार्थनीयं। यस्मात् धनं लभ्यते तद् रत्नं गृहाण, धनेन न किं लभ्यते?"।

भार्य्ययोक्तं, "यद्यत्र सुभोजनं सूते तद् गृह्यताम्, सर्व्वेषां प्राणिनां अन्नेनैव प्राणधारणं भवति"। स्नुषयोक्तं "यद्यत्र रत्नाभरणादिकं सूते तद् याच्यताम्"।

एवं चतुर्णां परस्परं विवादो बभूव। ततो ब्राह्मणो राज्ञः समीपमागत्य चतुर्णां विवादवृत्तान्तं न्यवेदयत्। राजापि तच्छ्रुत्वा तस्मै चत्वार्य्येव रत्नानि ददौ।

श्रोत्रं श्रुतेनैव न कुण्डलेन (२)
दानेन पाणिर्न च कङ्कणेन। (३)
आभाति (४) कायः करुणापराणां
परोपकारेण न चन्दनेन॥

नीति—चम्पकेषु यथा गन्धः कान्ति(५)र्मुक्ताफलेषु च।
यथेक्षुदण्डे माधुर्य्यं औदार्य्यं महतां तथा॥

---

(१) Described
(२) Earrings
(३) Bracelet
(४) Shines
(५) Lustre, radiance

त्रयाणां धूर्तानाम्

कस्मिंश्चिदधिष्ठाने मित्रशर्मा नाम ब्राह्मणः प्रतिवसति स्म। स कदाचित् माघमासे पशुप्रार्थनाय ग्रामान्तरं गतः। तत्र तेन कश्चिद् यजमानो याचितः 'भो यजमान आगामिन्याम् अमावस्यायां यक्ष्यामि (१) यज्ञं, तद् देहि मे पशुम् एकम्"। अथ तेन तस्मै शास्त्रोक्तः पीवरतनुः (२) पशुः प्रदत्तः। सोऽपि तं समर्थम् इतस्ततश्च गच्छन्तम् अवलोक्य स्कन्धे कृत्वा सत्वरं स्वपुराभिमुखः (३) प्रतस्थे।

अथ तस्य गच्छतो मार्गे त्रयो धूर्ताः सम्मुखा बभूवुः। तैश्च तादृशं स्थूलतनुं पशुं स्कन्धम् आरूढम् अवलोक्य मिथोऽभिहितम् "अहो अस्य पशोर्भक्षणाद् अद्यतन हिमपातं व्यर्थतां नेष्यामः। तदेनं वञ्चयित्वा पशुम् आदाय शीतत्राणं (४) कुर्मः"।

अथ तेषाम् एकतमो वेशपरिवर्त्तनं विधाय सम्मुखो भूत्वा तम् उवाच "भो भो किम् एवं जनविरुद्धं हास्यकार्य्यम् अनुष्ठीयते, यद् एष सारमेयः (५) अपवित्रः स्कन्धारूढो नीयते"।

---

(१) यज्ञं यक्ष्यामि यज्ञं करिष्यामि। Shall perform a sacrifice.
(२) Fleshy and well developed
(३) Towards his own city
(४) शीतत्राणं शीतात् आत्मरक्षणम्। Relief from cold
(५) सरमा कुक्कुरी तस्या अपत्यं पुमान् सारमेयः कुक्कुरः। Dog

ततश्च तेन कोपाभिभूतेन अभिहितम् "अहो किम् अन्धो भवान् यत् पशु सारमेय प्रतिपादयति" (१)। सोऽब्रवीत् "ब्रह्मन् कोपस् त्वया न कार्य्य, यथेच्छ गम्यताम्"।

अथ यावत् किञ्चिद् अध्वान्तर (२) गच्छति, तावद् द्वितीयो धूर्त्त सम्मुख समुपेत्य तम् उवाच "भो ब्रह्मन् कष्ट कष्टम्। यद्यपि वल्लभोऽय ते सारमेय तथापि स्कन्धम् आरोपयितु न युज्यते"। अथासौ सकोपम् इदम् आह "भो किम् अन्धो भवान् यत् पशु सारमेय वदति"। सोऽब्रवीत् "भगवन् मा कोप कुरु। अज्ञानात् मया अभिहितम्। त्वमात्मरुचित (३) समाचर"।

अथ यावत् स्तोक (४) वर्त्मान्तर गच्छति, तावत् तृतीयो ऽन्यवेशधारी (५) धूर्त्त सम्मुख समुपेत्य तमुवाच, "भो अयुक्त मेतत् यत् त्व सारमेय स्कन्धाधिरूढ नयसि। तत् त्यज्यता मेषो यावदन्य कश्चिन्न पश्यति'। अथासौ बहु विमृश्य त पशु सारमेयमेव मन्यमानो, भयाद् भूमौ प्रक्षिप्य, स्वगृहमुद्दिश्य पलायित। ततस्ते त्रयो मिलिला त पशुमादाय साह्लाद प्रतस्थिरे।

नीति —वञ्चकेभ्यो मनस्ताप साधूनामपि जायते।

---

(१) प्रतिपादयति प्रतिपन्न करोति। Prove

(२) A further short distance

(३) Do as you please (४) Little, small

(५) In a different guise

गृध्र-मार्ज्जारयो ।

अस्ति भागीरथी-तीरे गृध्रकूट नाम्नि पर्वते महान पर्कटी वृक्ष । तस्य कोटरे दैव दुर्विपाकात् गलित नख नयन (१) जरद्गवो नाम गृध्र प्रतिवसति। अथ कृपया तज्जीवनाय(२) तद्वृक्षवासिन पक्षिण स्वाहारात् किञ्चित् किञ्चित् उद्धृत्य ददति। तेनासौ जीवति शावक रक्षा च करोति।

अथ कदाचित् दीर्घकर्ण नामा मार्ज्जार पक्षिशावकान् भक्षयितु तत्र आगत । तमायान्त दृष्ट्वा पक्षि शावकै भयार्त्तै कोलाहल कृत । तत् श्रुत्वा जरद्गवेन उक्तम्—कोऽयमायाति।

दीर्घकर्णो गृध्रम् अवलोक्य सभयम आह—हा हतोऽस्मि। अधुना अतिसन्निधानेन पलायनमपि न सम्भवति। भवतु विश्वास तावत् उत्पाद्य अस्य समीपम उपगच्छामि। इत्यालोच्य उपसृत्य अब्रवीत्—आर्य्य ! त्वामभिवन्दे ।

गृध्र अब्रवीत्—कस्त्वम् ?

सोऽवदत—मार्ज्जारोऽहम।

गृध्रो ब्रूते—दूरम अपसर, नो चेत् हन्तव्योऽसि मया।

मार्ज्जारोऽवदत्—श्रूयतां तावत् मम वचनम। ततो यद्यहं वध्य तदा हन्तव्य ।

---

(१) One whose nails and eyes have decayed

(२) For his maintenance , For the support of his life

गृध्रो ब्रूते—ब्रूहि किमर्थम् आगतोऽसि।

सोऽवदत्—अहमत्र गङ्गातीरे नित्यस्नायी (१) निरामिषाशी (२) तिष्ठामि। यूय धर्म्म-ज्ञान रता (३) विश्वासभूमय (४) इति पक्षिण सर्व्वे सर्व्वदा ममाग्रे प्रस्तुवन्ति। अत भवद्भ्य धर्म्म श्रोतुम् इहागत। भवन्तश्च एतादृशा धर्म्मज्ञा यत् माम् अतिथि हन्तुमुद्यता। गृहस्थ-धर्म्मश्चैष—

अरावप्युचित कार्य्यम् आतिथ्य गृहमागते।
छेत्तु पार्श्वं गताच्छाया नोपसहरति (५) द्रुम ॥

यदि अन्न नास्ति तदा सुप्रीतेन (६) वचसापि तावत् अतिथि पूज्य। तथा चोक्तम्—

अतिथिर्यस्य भग्नाशो (७) गृहात् प्रतिनिवर्त्तते।
स तस्मै दुष्कृत दत्त्वा पुण्यमादाय गच्छति ॥

अन्यच्च—

उत्तमस्यापि वर्णस्य नीचोऽपि गृहमागत।
पूजनीयो यथायोग्य सर्व्व-देवमयोऽतिथि ॥

(१) Making daily ablutions

(२) A vegetarian

(३) Devoted to piety and learning

(४) A repository of trust and confidence

(५) Withdraws, withholds

(६) With eminently pleasing words

(७) Disappointed

गृध्रोऽवदत—मार्ज्जारो हि मांसरुचय (१)। पक्षिशावकाश्च अत्र निवसन्ति। तेनैव ब्रवीमि।

तत श्रुत्वा मार्ज्जारो भूमि स्पृष्ट्वा कर्णौ स्पृशति। ब्रूते च—मया धर्मशास्त्र श्रुत्वा वीतरागेण दुष्करं व्रत चान्द्रायणम अध्यवसितम।

एव विश्वास्य स मार्ज्जार तरु कोटरे स्थित। ततो दिनेषु गच्छत्सु स पक्षिशावकान आक्रम्य कोटरमानीय प्रत्यह खादति। येषाम् अपत्यानि खादितानि तै शोकार्त्तै विलपद्भि (२) इतस्ततो जिज्ञासा समारब्धा। तत् परिज्ञाय मार्ज्जार कोटरात् निःसृत्य वहि पलायित। पश्चात् पक्षिभि इतस्ततो निरूपयद्भि तत्र तरु-कोटरे (३) शावकास्थीनि प्राप्तानि। अनन्तरम अनेनैव जरद्गवेन अस्माक शावका खादिता इति सर्व्वै पक्षिभि निश्चित्य स गृध्रो व्यापादित।

नीति —अज्ञातकुलशीलस्य (४) वासो देयो न कस्यचित्।

(१) Fond of flesh

(२) Lamenting grief stricken

(३) In the hollow of the tree

(४) A stranger One whose lineage and character are not known

विद्या

विद्वत्त्वञ्च नृपत्वञ्च नैव तुल्यं कदाचन ।
स्वदेशे पूज्यते राजा विद्वान् सर्व्वत्र पूज्यते ॥१॥
कोऽतिभारः समर्थानां किं दूरं व्यवसायिनां (१) ।
को विदेशः सविद्यानां कः परः प्रियवादिनाम् ? ॥२॥
विद्या ददाति विनयं विनयाद् याति पात्रताम् (२) ।
पात्रत्वाद् धनमाप्नोति धनाद्धर्म्मं ततः सुखम् ॥३॥
ज्ञातिभिर्वण्ट्यते नैव चौरेणापि न नीयते ।
न दानेन क्षयं याति विद्यारत्नं महाधनम् ॥४॥
अनेकसंशयोच्छेदि (३) परोक्षार्थस्य (४) दर्शकं ।
सर्व्वस्य लोचनं शास्त्रं यस्य नास्त्यन्ध एव सः ॥५॥
सङ्गमयति (५) विद्यैव नीचगापि नरं सरित् (६) ।
समुद्रमिव दुर्द्धर्षं नृपं भाग्यमतः परम् ॥ ६ ॥
स जीवति गुणा यस्य धर्म्मो यस्य स जीवति ।
गुणधर्म्मविहीनो यो निष्फलं तस्य जीवनम् ॥ ७ ॥

---

(१) Persevering industrious engaged in business

(२) Competence

(३) A thing that clears up many doubts

(४) Of an invisible object

(५) Unites

(६) A river

त्रयाणां मत्स्यानाम्

कस्मिंश्चिज्जलाशये अनागतविधाता प्रत्युत्पन्नमतिः यद्भविष्यश्चेति (१) त्रयो मत्स्याः प्रतिवसन्ति स्म। अथ कदाचित् तं जलाशयं दृष्ट्वा गच्छद्भिर्मत्स्यजीविभिः अभिहितम् अहो बहुमत्स्यो(२)ऽयं ह्रदः कदाचिदपि न अस्माभिरन्वेषितः। अद्य तावदाहारवृत्तिः सञ्जाता सन्ध्यासमयश्च संवृत्तः (३)। ततः प्रभाते अत्रागन्तव्यम् इति निश्चयः।

अथ तेषां तत् कुलिशपातोपमं (४) वचः समाकर्ण्य अनागतविधाता सर्वान् मत्स्यानाहूय इदमूचे अहो (५) श्रुतं भवद्भिः यत् मत्स्यजीविभिरभिहितम्। तद्रात्रावेव गम्यतां

---

(१) अनागतविधाता (One who provides against what evil is yet to come) अनागतस्य अनुपस्थितस्य सम्भावितस्येति यावत् विधाता प्रतीकारकः यः अनिष्टं सम्भाव्य पूर्वमेव तत्प्रतीकारं चिन्तयति। प्रत्युत्पन्नमतिः (Quick witted having presence of mind) प्रत्युत्पन्ना कार्यकाले उपस्थिता मतिः कर्तव्यावधारणशक्तिर्यस्य विपदि अनाकुलेन मनसा प्रतीकारचिन्तनसमर्थः। यद्भविष्यः (Depending on fate fatalist) यत् भविष्यं तत् भवत्येव न तस्य प्रतिविधानं कर्तुं शक्यते इति निश्चित्य उपायचिन्तनविमुखः।

(२) Containing numerous fish

(३) संवृत्तः प्रवृत्तः उपस्थितः इति यावत्। Is come, has approached

(४) कुलिशपातोपमं वज्रपातसदृशम्। Like a thunder bolt

(५) अहो भोः। Oh, Ho

मन्यत् सर। नून प्रभातसमये ते मत्स्यजीविनोऽत्र समागत्य मत्स्यसञ्चय (१) करिष्यन्ति, एतन्मम मनसि वर्त्तते। तत्र युक्त (२) साम्प्रत क्षणमपि अत्रावस्थातुम"। एतदाकर्ण्य प्रत्युत्पन्नमति प्राह "भो मत्स्यम अभिहित भवता। ममापि अभीष्ट(३)मेतत्। तदन्यत्र गम्यताम"।

अथ तत् समाकर्ण्य उच्चैर्विहस्य यद्भविष्य प्राह "हहो न सम्यक् मन्त्रित (४) भवद्भ्याम। कि तेषा वाङ्मात्रेण (५) पितृपैतामहिक(६)मेतत सरस्त्यक्तु युज्यते। यदि आयु क्षयोऽस्ति तदा अन्यत्र गतानामपि मृत्युर्भविष्यति। तदह न यास्यामि। भवद्भ्यान्तु यद्रोचते तत् क्रियताम"।

एव तस्य त निश्चय (७) ज्ञात्वा अनागतविधाता प्रत्युत्पन्नमतिश्च निष्क्रान्तौ (८) सह परिजनेन। अथ प्रभाते तैर्मत्स्यजीविभि जालैस्त जलाशयमालोड्य यद्भविष्येण सह तत् सरो निर्मत्स्यता नीतम।

नीति —अनागत य कुरुते स शोभते।

---

(१) Extermination (२) Advisable
(३) Desire, intention
(४) Judged, considered
(५) Simply on their words
(६) Inhabited by forefathers Ancestral
(७) Resolve Determination
(८) Went out

कृपणकथा

आसीन्मथुराया गूढधनो नाम वैश्य । स च कला-वाणिज्यादिभि (१) बहुलीकृतवित्त (२) परमकृपणो बभूव। एकदा दुर्भिक्षे प्रत्यासन्ने (३) सञ्जातभयो (४) ऽनुचिन्तितवान्, यदस्मिन दुर्भिक्षे मम वित्तानि पुत्रकलत्रादिभि खादितव्यानि मया धनशोकेन मर्त्तव्य, तन्न भद्रम। यत

एकाकी पुरुष श्रीमान (५) धन तस्य पर सुहृत्।
अन्ये चासुहृद सर्वे धनमूल कुटुम्बकम (६)॥

तत् परालक्ष्ये (७) स्थाने वित्तानि रक्षामीति परामृश्य तथा कृतवान्।

---

(१) कला—नृत्यादिका चतुःषष्टिविधा उपविद्या। By commerce arts and industries

(२) One whose wealth has been enormously multiplied

(३) Near imminent

(४) सञ्जातभय—सञ्जातं भयं अनिष्टाशङ्का यस्य तथोक्त। Afraid terrified

(५) श्रीमान लक्ष्मीवान (Fortunate) पुरुषा हि निजभाग्यगुणेनैव लक्ष्मीवन्तो भवन्ति, परमाश्रित्य परानुकूल्येन च कस्यचिदपि धनं न जायत इत्यर्थ।

(६) कुटुम्बक—कुटुम्बस्य भाव। भावे कन्। Relationship

(७) Secret to others

ततो दुर्भिक्षे आपतिते परीवारान् सर्वान् अन्नेन विना म्रियमाणान (१) पश्यन्नपि कस्मैचित् किमपि न ददौ।

अतस्तस्य पुत्रकलत्रादय सर्व्वेऽपि विनाशेनैव मृता। स्वयञ्च प्राणमात्रावशेष परामृष्टवान (२)।

यत्र पुत्रकलत्रेभ्यो दत्त वित्त मयार्ज्जितम।
तन्निजप्राणरक्षार्थं कथ भोक्ष्ये निराकुल (३)॥

तत स्वप्राणरक्षायामपि स वित्त न विनियुङ्क्ते। उपवासेन दिनानि यापयन्त तमतिदुर्व्वल दृष्ट्वा तन्नगरवासिन कारुणिका पुरुषा केऽपि प्रोचु, हे कृपण! किं करिष्यसि तेन धनेन यस्मिन विद्यमानेऽपि निजप्राणान न रक्षसि?

गूढधन उवाच, अये नगरवासिन पुरुषा! मया प्राणव्ययेऽपि धनव्ययो न स्वीक्रियते। ते ऊचु, तर्हि राज्ञा चौरेण वा गृहीतव्य त्वयि विपन्ने तव धनम। गूढधन उवाच, तदन्यस्यैव बुद्धिहीनस्य धनमन्ये गृह्णन्ति। मया स्वकीय धन गले बद्ध्वा मर्त्तव्यमित्यभिधाय धनपोट्टलक (४) गृहीत्वा स गङ्गातीरे मर्त्तु जगाम। तत्र च नाविक धीवरमुपसर्प्याह, भो भ्रातर्नाविक! प्राणांस्त्यक्तुकामेनापि (५) मया

---

(१) Starving to death

(२) Thought within himself

(३) Calm, peaceful

(४) Purse of money bag of coins

(५) Desirous of giving up my life

धनानि त्यक्तुं न शक्यन्ते। ततस्त्वं परिवारशोकाकुलं (१) मां गङ्गायां मज्जयित्वा मारय। तन्निमित्तं तुभ्यमेकं सुवर्णखण्डं (२) दास्यामि। नाविक उवाच, तर्हि मे सुवर्णखण्डं दर्शय। ततः सुवर्णानि सभयं दर्शयित्वा पुनरब्रवीत्, भ्रातर्नाविक! सर्व्वाणि सुवर्णानि परस्मै दातुमयोग्यानि, तत एकामेव मुद्रां गृहीत्वा मारय माम्। नाविकस्तु तानि सुवर्णानि दृष्ट्वा, तथास्तु इत्यवदत्। ततस्तं जले मज्जयित्वा गतप्राणं कृत्वा सुवर्णानि गृहीत्वा स नाविकः कृतार्थो बभूव।

नीतिः—दानोपभोगहीनेन धनेन दुर्गतिर्नृणाम्।

---

(१) Bereaved of members of his family

(२) सुवर्णखण्डम्—सुवर्णमुद्राम्। Gold coin, Sovereign

अलसकथा ।

उद्योगहेतुरुत्साह प्राणिधर्म्मो निगद्यते ।
क्रियासु सर्वरूपासु (१) विना तेनालसो भवेत ॥

आसीन्मिथिलाया वीरेश्वरो नाम राजमन्त्री। स च सर्व्वेभ्यो दुर्गतेभ्योऽनाथेभ्य प्रत्यहमिच्छाभोग (२) प्रयच्छति असौ करुणया अलसानपि दरिद्रवत् प्रतिपालयति। यत —

दुर्गतानाञ्च सर्वेषामलस प्रथमो मत ।
किञ्चिन्न क्षमते (३) कर्त्तुं विदग्धो जठरानले ॥

ततोऽलसपुरुषाणा तत्रेष्टलाभ श्रुत्वा धूर्त्ता अपि कृत्रिम मालस्य दर्शयित्वा भोज्य गृह्णन्ति। एवञ्च अलसशालायां बहुद्रव्यव्यय दृष्ट्वा राजपुरुषै (४) परामृष्ट, यदज्ञमान मत्वा करुणया अलसेभ्य स्वामी वस्तूनि प्रयच्छति। छलेन अनलसा अपि तानि गृह्णन्तीत्यस्माक प्रमाद। तदस्मद्दोषेण यदि

---

(१) क्रियासु सर्व्वरूपासु—In all sorts of work

(२) इच्छाभोग—इच्छया इच्छानुसारेण भोग तम। Feast after their own choice

(३) किञ्चिन्न क्षमते—किञ्चिदपि कार्य्य कर्त्तु न शक्नोति। Is not able to do any thing at all

(४) Officers of the King

स्वामिधनं वृथा विनष्टं भवेत् तदा वयं प्रत्यवायिनः । अतोऽलसपुरुषाणां परीक्षां कुर्म्मः ।

इति परामृश्य निद्रितेष्वलसपुरुषेषु ते राजपुरुषा अलसशालायां वह्निं योजयित्वा निरूपयामासुः । ततो गृहलग्नं प्रवृद्धवह्निं दृष्ट्वा धूर्त्ताः सर्व्वे पलायिताः । पश्चादीषदलसा अपि पलायिताः । चत्वारः पुरुषास्तत्रैव सुप्ताः परस्परमालपन्ति । एकेन वस्त्रावृतमुखेनोक्तं (१), अहो कथमयं कोलाहलः ? द्वितीयेनोक्तं, तर्क्यते यदस्मिन् गृहेऽग्निर्लग्नोऽस्ति । तृतीयेनोक्तं, कोऽपि तथा धार्म्मिको नास्ति, य इदानीं जलार्द्रवासोभिः(२)रस्मान् प्रावृणोति । चतुर्थेनोक्तं, अये वाचालाः ! वृथा कथं जल्पथ ? तूष्णीं तिष्ठत । ततश्च तेषामपि तेषामेवं परस्परालापं श्रुत्वा वह्निञ्च प्रवृद्धमेषामुपरि पतिष्यन्तं दृष्ट्वा राजपुरुषैर्भयेन चत्वारोऽप्यलसाः केशेष्वाकृष्य गृहाद्बहिः कृताः । ततस्तानालोक्य तैः पठितम्—

पतिरेव गतिः स्त्रीणां बालानां जननी गतिः ।
नालसानां गतिः काचित् लोके कारुणिकं विना ॥

---

(१) Covering his face with a cloth

(२) With pieces of cloth wet with water

बलाद् बुद्धि गरीयसी

कस्मिंश्चिद्वने भासुरको नाम सिंह प्रतिवसति स्म। असौ नित्यमेव अनेकान मृगशशकादीन व्यापादयामास (१)।

अथैकदा तद्वनवासिन सर्व्वे वराह महिष शशकादयो मिलित्वा तमभ्युपेत्य प्रोचु स्वामिन किमनेन सकल मृग वधेन (२)। तव एकेनैव मृगेण तृप्तिर्भवति। तत् क्रियता-मस्माभि सह समय (३)। अद्य प्रभृति प्रतिदिनमेको मृगस्तव भक्षणार्थं समेष्यति। एव कृते तव तावत् प्राणयात्रा(४) क्लेश विना भविष्यति, अस्माकमपि सर्व्वोच्छेदन (५) न स्यात्। तदेष राजधर्म्मो ऽनुष्ठीयताम।

अथ तेषा तद्वचनमाकर्ण्य भासुरक आह अहो सत्यमभि हित भवद्भि। पर यदि नित्यमेव एको मृगो नागमिष्यति तदन सर्व्वानेव भक्षयिष्यामि। अथ ते तथेति प्रतिज्ञाय निश्चिन्तास्तत्र वने निर्भया पर्य्यटन्ति। एकश्च प्रतिदिन

---

(१) व्यापादयामास विनाशयामास। Killed

(२) सकल मृग वधेन समस्त पशु सहारेण। By the destruction of all the beasts

(३) समय प्रतिज्ञा नियम इति यावत्। Treaty, arrangement

(४) प्राणयात्रा प्राणधारण जीविकानिर्व्वाह इति यावत। Maintenance

(५) Total annihilation

क्रमेणायाति। वृद्धो वा वैराग्ययुक्तो (१) वा शोकग्रस्तो वा पुत्र-कलत्र-नाश भीतो (२) वा तेषां मध्यात् तस्य भोजनार्थं मध्याह्न-समये उपतिष्ठति।

अथ कदाचित् शशकस्य वार (३) समायात। प्रेषितश्च अनिच्छन्नपि स समस्तमृगै। स च मन्द मन्द गत्वा वेलातिक्रम विधाय व्याकुल हृदय सिंहस्य वधोपायं चिन्तयन् दिनशेषे प्राप्त। सिंहस्तु वेलातिक्रमेण क्षुधार्त्त कोपाविष्ट सृक्कणी (४) परिलेलिहत् अचिन्तयत् "अहो मया प्रातरेव नि सत्त्व (५) वन कर्त्तव्यम"।

एव चिन्तयति तस्मिन शशको मन्द मन्द गत्वा प्रणम्य तस्याग्रे स्थित। अथ त चिरादायात लघुकलेवरञ्चावलोक्य कोपज्वलित(६)स्त निर्भर्त्सयन्नाह "रे शशकाधम एकस्तावत् लघुस्त्वम अपरतश्च वेलातिक्रमेणागत। अस्मादपराधात् त्वां निपात्य प्रात सकलान्यपि सत्त्वान्युच्छेत्स्यामि" (७)

---

(१) Indifferent to the worldly pleasures

(२) Afraid of the destruction of wife and children

(३) वार दिनस पर्य्याय इति यावत्। Turn

(४) सृक्कणी ओष्ठप्रान्तौ। Corners of the lips

(५) नि सत्त्व जन्तुशून्यम एतद्वनस्थितान सर्व्वानेव जन्तून हनिष्यामीत्यर्थं। Denuded of all animals

(६) Flaming up in anger

(७) उच्छेत्स्यामि विनाशयिष्यामि। I will exterminate

अथ शशक प्रणम्य सविनय प्रोवाच स्वामिन नात्मापराधो मम न चापरेषा सत्त्वानाम। श्रूयतां कारणम। सिंह आह सत्वर निवेदय यावन्मम दंष्ट्रान्तर्गतो (१) न भवसि।

शशक आह स्वामिन समस्तमृगैरद्य मम वार विज्ञाय अह प्रेषित। मा तु लघुतर दृष्ट्वा ते अपरान पञ्च शशकान मया सह प्रेषितवन्त। ततश्चाहमागच्छन पथि महता केनचिदपरसिंहेन विवरान्निर्गत्य (२) अभिहित रे क्व प्रस्थिता यूयम। मयाभिहित वय वनस्वामिनो भासुरकसिंहस्य आहारार्थं समयधर्मेण तत्सकाशे गच्छाम।

ततस्तेनाभिहित "मदीयमेतद्वनम। मया सह समयधर्मेण समस्तैर्मृगैर्वर्त्तितव्यम। चौर स भासुरक। अथ (३) सोऽत्र वने राजा तर्हि पञ्च शशकान अत्र धृत्वा तमाहूय द्रुतमागच्छ। य कश्चिदावयो पराक्रमेण राजा भविष्यति स सर्वानेव मृगान भक्षयिष्यति। ततोऽह तेनादिष्ट स्वामि सकाशमागत। एतत् वेलातिक्रमकारणम (४)। तदत्र स्वामी प्रमाणम (५)।

---

(१) दंष्ट्रान्तर्गत दन्त मध्य प्रविष्ट। Fallen into my jaws

(२) Coming out of the den

(३) अथ यदि। If

(४) Cause of the lapse of so much time, cause of my coming after the fixed hour

(५) तत् तस्मात् अत्र अस्मिन विषये स्वामी प्रभु प्रमाण स्वामिनैव कर्त्तव्यम अवधारयतु इत्यर्थ। Judge

तच्छ्रुत्वा भासुरक आह भद्र यद्येवं सत्वरं दर्शय मे तं चौरसिंहम्। येनाहं मृगकोपं तस्योपरि क्षपयित्वा (१) स्वस्थो भवामि। शशक आह आगच्छतु स्वामी। एवमुक्त्वा असावग्रे प्रस्थितः। ततश्च कञ्चित् कूपमासाद्य स भासुरकमाह स्वामिन् कस्ते प्रतापं सोढुं समर्थः। त्वां दृष्ट्वा दूरत एव स चौरः स्वदुर्गं प्रविष्टः। आगच्छ दर्शयामि।

तच्छ्रुत्वा भासुरक आह भद्र सत्वरं दर्शय मे दुर्गम्। तदनु (२) दर्शितस्तेन कूपः। सोऽपि मूर्खः सिंहः कूपमध्ये आत्मनः प्रतिबिम्बं दृष्ट्वा अपरसिंहधिया (३) नादं मुमोच (४)। ततस्तत्प्रतिशब्देन द्विगुणतरो नादः कूपात् समुत्थितः। अथासौ तं नादमाकर्ण्य कोपज्वलित आत्मानं कूपे क्षिप्त्वा प्राणान् मुमोच। तदाप्रभृति सर्वे मृगा निर्भयास्तत्र वने वसन्ति स्म।

---

(१) क्षपयित्वा शमयित्वा। Venting

(२) तदनु तत्पश्चात्। After that

(३) अपरसिंहधिया अन्यसिंहबोधेन अन्य सिंहमवधार्येत्यर्थः। Taking him for another lion

(४) Set up a loud roar

धर्म्मबुद्धि-पापबुद्ध्योः ।

कस्मिंश्चिदधिष्ठाने (१) धर्म्मबुद्धिः पापबुद्धिश्च द्वे मित्रे प्रतिवसतः स्म। कदाचित् पापबुद्धिना चिन्तितम् अहं तावत् मूर्खो दरिद्रश्च। तदेनं धर्म्मबुद्धिमादाय देशान्तरं गत्वा अस्याश्रयेण अर्थोपार्ज्जनं (२) कृत्वा एनम् अपि वञ्चयित्वा सुखी भवामि। अथ अन्यस्मिन्नहनि स धर्म्मबुद्धिं प्राह भो मित्र देशान्तरमदृष्ट्वा वार्द्धके (३) शिशुजनस्य का वार्त्ता कथयिष्यसि। तदाकर्ण्य धर्म्मबुद्धिः प्रहृष्टमना गुरुजनानुज्ञातः (४) शुभेऽहनि तेन सह देशान्तरं प्रस्थितः। तत्र धर्म्मबुद्धिप्रभावेण पापबुद्धिनापि प्रभूतं वित्तमासादितम्। ततश्च द्वावपि तौ प्रभूतं द्रव्यमर्ज्जयित्वा प्रहृष्टौ स्वगृहं प्रति औत्सुक्येन निवृत्तौ।

अथ स्वस्थानसमीपवर्त्तिना (५) पापबुद्धिना धर्म्मबुद्धिरभिहितः भद्र न सर्व्वम् एतद्वित्तं गृहं नेतुं युज्यते। ज्ञातयो बान्धवाश्च प्रार्थयिष्यन्ते। तदस्मिन् गहने वने क्वापि भूमौ निधाय किञ्चिन्मात्रमादाय गृहं प्रविशाव। भूयः प्रयोजने सञ्जाते समेत्य अस्मात् स्थानान्नेष्याव। तदाकर्ण्य धर्म्मबुद्धिराह भद्र तर्हि एवं क्रियताम्। तथानुष्ठिते द्वावपि तौ स्वगृहं गत्वा सुखेन स्थितवन्तौ।

---

(१) अधिष्ठाने नगरे। Town City

(२) Acquisition of wealth

(३) In old age

(४) With the permission of his superiors

(५) When they came near their place

एकदा पापबुद्धिर्निशीथे अटवीं गत्वा तत् सर्वं वित्त समादाय गर्त्तं पूरयित्वा स्वभवनं जगाम। अथ अन्येद्युः पापबुद्धिः धर्म्मबुद्धिं समेत्य प्रोवाच सखे बहुकुटम्बौ (१) आवां वित्ताभावात् सीदाव (२)। तद्गत्वा तत्र स्थाने किञ्चिन्मात्रं धनमानयाव। सोऽब्रवीत भद्र एवं क्रियताम्।

अथ तौ तत स्थानं यावत् खनतः तावद्रिक्तं भाण्डं दृष्टवन्तौ। अत्रान्तरे (३) पापबुद्धिः आत्मशिरस्ताडयन् (४) प्रोवाच भो धर्म्मबुद्धे त्वया हृतम् एतद्धनं नान्येन, यतो भूयोऽपि गर्त्तापूरणं कृतम्। तत् प्रयच्छ मे तस्यार्द्धम्, अन्यथा अहं राजकुले निवेदयिष्यामि (५)। स आह भो दुरात्मन् मैवं वद। धर्म्मबुद्धिः खल्वहं न एतच्चौरकर्म्म करोमि। एवं द्वावपि तौ विवदमानौ धर्म्माधिकरणं (६) गत्वा प्रोचतुः परस्परं दूषयन्तौ।

अथ तौ धर्म्माधिकरणाधिष्ठितैः (७) पुरुषैर्दिव्यार्थं यावन्नियोजितौ तावत् पापबुद्धिराह अहो न सम्यक् दृष्टोऽयं

(१) बहुकुटम्बौ बहुपोष्यवर्गौ। Havin, many relatives to support

(२) सीदाव अवसादं प्राप्नुव क्लेशं सहावहे इति यावत्। Are suffering much

(३) अत्रान्तरे अस्मिन् समये। In the mean time

(४) Striking his head with his own hands

(५) Shall file a suit in the court of law complain to the officers of the king

(६) धर्म्माधिकरणं व्यवहारदर्शनस्थानं विचारालयमिति यावत्। Court of justice

(७) धर्म्माधिकरणाधिष्ठितैः धर्म्माधिकरणनियुक्तैः। Judges of the court Gentlemen on the bench

न्याय (१)। अत्र विषये वनदेवता मम साक्षीभूता तिष्ठति। सैव आवयोरेकतरं चौरं वा साधुं वा करिष्यति। अथ तैः सर्व्वैरभिहितं भो युक्तमुक्तं भवता। अस्माकमपि अत्र विषये महत् कुतूहलं* वर्त्तते। प्रत्यूषसमये युवाभ्याम अस्माभिः सह तत्र वनोद्देशे गन्तव्यम।

एतस्मिन्नन्तरे पापबुद्धिः स्वगृहं गत्वा स्वजनकमुवाच तात प्रभूतोऽयं मया अर्थो धर्म्मबुद्धेश्चोरितः। स च तव वचनेन परिणति (२) गच्छति, अन्यथा अस्माकं प्राणैः सह यास्यति। स आह वत्स तद् वद द्रुतं यत् कथयित्वा स्थिरतां नयामि। पापबुद्धिः प्राह तात अस्ति तस्मिन प्रदेशे महाशमी। तस्यां महत् कोटरमस्ति। तत्र त्वं साम्प्रतमेव प्रविश। ततः प्रभाते यदाहं सत्यश्रावणं (३) करोमि तदा त्वया वाच्यं धर्म्मबुद्धिश्चौर इति।

तथा अनुष्ठिते प्रत्यूषे स्नात्वा पापबुद्धिः धौतप्रावरणो (४) धर्म्मबुद्धिपुरःसरो धर्म्माधिकरणिकैः (५) सह तां शमीमभ्येत्य

(१) न्याय विचार। Decision Trial

(२) परिणति परिपाकम्। Appropriation consummation

(३) सत्यं श्रावयामि—सत्यं वदसि चेत् स्वर्गमवाप्स्यसि अनृतं वदसि चेत् नरकमवाप्स्यसि एवं प्रकारेण सम्वेतान् साक्षिणः साक्ष्यकथनात् पूर्व्वं राजपुरुषादयो यत् श्रावयन्ति तत् सत्यश्रावणम्। Shall administer the oath to declare the truth

(४) प्रावरणम उत्तरीयवस्त्रम। Putting on clothes duly washed

(५) धर्म्माधिकरणिकैः धर्म्माधिकरणनियुक्तैः। Judges

*रम्यवस्तु समालोके लोलता स्यात् कुतूहलम्।

तारस्वरेण (१) प्रोवाच "भगवति वनदेवते आवयोर्म्मध्ये यश्चौर तं कथय" (२)। अथ पापबुद्धिपिता शमीकोटरस्थः प्रोवाच "भो शृणुत शृणुत धर्म्मबुद्धिना अपहृतम् एतद्धनम्"। एतदाकर्ण्य सर्व्वे ते राजपुरुषा विस्मयोत्फुल्ललोचना अभवन्। धर्म्मबुद्धिना तु तच्छमीकोटरं वह्निभोज्यद्रव्यैः (३) परिवेष्ट्य वह्निना सन्दीपितम् (४)।

अथ ज्वलति तस्मिन् अर्द्धदग्धशरीरः स्फुटिताक्षः (५) करुणं परिदेवयन् (६) पापबुद्धिपिता शमीकोटरान्निश्चक्राम। ततस्ते सर्व्वे पृष्टः भो किमिदम्। इत्युक्ते स पापबुद्धिविचेष्टितं सर्व्वमिदं तेषां निवेद्य उपरतः (७)। अथ पापबुद्धिं शमीशाखायां प्रविलम्ब्य (८) राजपुरुषा धर्म्मबुद्धिं प्रशस्य इदमूचुः अहो साधु इदमुच्यते।

उपायं चिन्तयेत् प्राज्ञस्तथापायञ्च चिन्तयेत्।

अनेन पापबुद्धिना उपायश्चिन्तितो नापायः। ततः तत्फलं प्राप्तम्।

---

(१) तारस्वरेण उच्चस्वरेण। In a loud voice

(२) तं कथय तं प्रकाशय। Declare him definitely as such

(३) वह्निभोज्यद्रव्यैः अग्न्युद्दीपकवस्तुभिः। With combustible things

(४) Set fire to

(५) स्फुटिताक्षः स्फुटितनयनः। With eyes split out or burst

(६) परिदेवयन् विलपन्। Crying piteously

(७) उपरतः मृतः। Dead

(८) प्रविलम्ब्य रज्ज्वा बद्ध्वा लम्बयित्वा। Hanging

सत्यवीरकथा।

पुरा हस्तिनापुरनाम्नि (१) नगरे महामल्लनामा यवनेश्वरो बभूव। तस्मिन् क्षितिमण्डलं शासति तदुत्कर्षासहिष्णु काफ़रराज (२) स्तमभियोद्धुं सकल-बल सहितस्तत्राजगाम। यवनेश्वरस्तमायान्तं ज्ञात्वा काम्बोज (३) तुरङ्गैश्चाश्वारोहै सैनिकै परिवृत पुराद्बहिर्भूय तेन सम संग्राममङ्गीचकार। तयो समारब्धे संग्रामे बलवता काफ़र राज-सैन्येन हन्यमाना यवन योधा रणात् पराङ्मुखा बभूवु। तत पलायमान निज-बल दृष्ट्वा यवनेश्वर उवाच, रे रे मम सैनिका युष्माकं मध्ये कोऽपि तादृशो नास्ति य इदानी रिपुभयात् पलायमान मम सैन्य स्वेन बाहुबलेन त्राणमवलम्बते? तच्च यवन राज वचन श्रुत्वा

---

(१) हस्तिनापुर—The capital of the Kauravas and Pandavas the remains of which still exist about 57 miles to the north east of the modern city of Delhi on the bank of the old channel of the Ganges It was founded by Hastin, a King of the Lunar line

(२) King of Africa

(३) काम्बोज— This name is applied to the people of the north western corner of India the country was noted for the breeding of horses

कर्णाट कुल सम्भवो (१) नरसिंह देव नामा चौहानकुल (२) सम्भव वीरव्रत नामा च राजकुमारौ प्रोचतु राजन्! क इदानीं रिपुत्रासभग्न भवद्दल निवारयितु शक्नोति, यदि क्षण पराक्रमं भवान अवलोकयति, तदा आवाम भवतो विपक्ष पराभवितु चेष्टावहे। यवनेश्वर उवाच, साधु कुमारौ साधु युवाभ्यामन्य क एतादृग व्यवस्यति? ततो नरसिंहदेव कशाघातेन तुरग ताडयित्वा सहसा काफेरबल प्रविवेश व श्र च विजयिनमायान्त काफेरराज शल्येन हृदि हतवान्। काफेरराजस्तु गतप्राणो भूमौ निपपात। वीरव्रत देवेन च भूमौ पतितस्य तस्य शिरश्छित्वा यवनराजस्य पुरो नीतम्। यवनेश्वर उवाच कस्येद शिर? वीरव्रत

(१) कर्णाट—The modern Karnatic the name however was anciently applied to the central districts of the peninsula including Mysore

(२) The Chouhans are one of the Agnikulas who are divided into four tribes the Pramaras the Parihasas the Chaluks and the Chouhans The last mentioned tribe was the most valiant of all the name meaning the 'four handed warrior The genealogical tree of the Chouhans exhibits ३९ princes from Anhub the first celebrated Chouhan, down to Prithviraja the last of the Hindu emperors The Chouhans sent forth twenty four branches of whom the most celebrated are the existing families of Boondi and Kotha

(३) पराक्रमतुलितनरसिंहन—पराक्रमेण तुलित अनुकृत नरसिंह नृसिंहावतार येन तथोक्त।

कथयति, काफेरराजस्य। यवनेश्वर उवाच, केनासौ हत? वीरव्रतो ब्रूते, राजन्। पराक्रमशालिना नरसिंहदेवेन हत। तत्पश्चाद्गामिना मया शिरश्छिन्नम्। यवनेश्वर उवाच, नरसिंहदेव कुत्र? वीरव्रतो ब्रूते, काफेर-राज-सन्निधान वर्त्तिभि स्वामिवधामर्षितै मङ्गोलसैनिकै (१) र्बहु-भिरेको हन्यमानो मया दृष्ट, क्व गत कीदानीमस्ति वा तन्न ज्ञायते। ततो यवनराज परसैन्य हतनायक पलायमान दृष्ट्वा परमानन्दो (२) बभूव। पुरुषांश्च तदनुगामिन स्वसैनिकान प्रत्याह, रे रे सैनिका। पलायमानान परभटान कि निहथ? सम्प्रति राज्यरक्षितार काफेर राज हतवन्त नरसिंहदेव मे विज्ञापयत। तदनन्तरमेकत्र संग्राम-प्रदेशे वहद्रुधिर (३) पुष्पित किंशुकमिव वेदना-मूर्च्छित नरसिंहदेव यवन राजो ददर्श तुरङ्गादवतीर्य्य च बभाषे, हे नरसिंहदेव। जीवि-ष्यसि? नरसिंहदेव उवाच, राजन्। मया यत् कृत कि तदवगत भवता? यवनेश्वर उवाच ज्ञात मया। कथित वीरव्रत देवेन, त्वया मम शत्रुर्हत। नरसिंहदेव उवाच, तर्हि जीविष्यामि। यत —

---

(१) मङ्गोलसैनिक —मङ्गोला महम्मदीय जाति विशेषा सैक देशस्य मध्ये पाठानाम मन्यतम। तथा सैनिक स्वपक्षीययोध।

(२) परमो आनन्दो यस्य Highly delighted

(३) वहद्रुधिर Bleeding

स्वीकृतं दुष्करं कर्म्म मया यस्य हितेच्छया।
तेन विज्ञायमानो मे फलितः श्रमपादपः॥

ततो यवनराजस्तं कुमारं नाना भेषज-प्रयोगैः स्वल्पैरेव दिवसैस्तं निरामयमकरोत्। तदनन्तरं काञ्चन छत्र चामरादिभिस्तं पूजयितुमुपचक्रमे। ततो नरसिंहदेव उवाच, राजन्! युद्धं राजपुत्राणां स्वाभाविक एव धर्म्मस्तत् किमद्भुतं मया कृतं, यदियं मम पूजा क्रियते? यदि तु पूजैव कर्त्तव्या, तदा वीरव्रत-देवस्य क्रियतां, येन रिपु-शिरोऽस्यानीय सत्यं रक्षणानुरोधेन भवतः पुरस्तान्मम यशः प्रकाशितं, स्वपौरुषं न स्थापितम्। अन्यथानेन नीयमानं रिपुशिरो दृष्ट्वा को वा अवगन्तुं शक्नुयात्, यन्मया मारितो रिपुरिति। तदयमेव प्रथमं पूज्यताम्। वीरव्रतदेव उवाच, कुमार नरसिंहदेव मामैवं ब्रूहि, कथमहं तव पराक्रम फलमादाय परोच्छिष्टजीवी भविष्यामीति। नरसिंहदेव उवाच, साधु सत्यवीर साधु! अनेन तव सत्येन सर्व्वमेव (१) विवेचितम्।

ततस्तयो परस्परमालापमुपकर्णयता समुपजात-परितोषेण यवनराजेन द्वावपि कुमारौ तुल्यमेव सत्कृतौ।

---

(१) सर्व्वमेव विवेचितं—सर्व्वं ऐहिकं पारत्रिकं समस्तमेव कुशलं विवेचितं विचारितं विचार्य्य सम्पादितमित्यर्थः। इह ते सत्यं श्रेयः आयुश्च च आकाशपाय कल्पते इत्यर्थः। Has taken note of all considerations relevant to your good

अर्थकाङ्क्षिणा कर्त्तव्यम् ।

षड्दोषा पुरुषेणेह हातव्या भूतिमिच्छता (१) ।
निद्रा तन्द्रा भय क्रोध आलस्य दीर्घसूत्रता ॥

उत्साह सम्पन्नमदीर्घसूत्र,
क्रियाविधिज्ञ व्यसनेष्वसक्त ।
शूर कृतज्ञ दृढ सौहृदश्च (२)
लक्ष्मी स्वय याति निवासहेतो ॥

उद्यमेन हि सिध्यन्ति कार्य्याणि न मनोरथ ।
न हि सुप्तस्य सिहस्य विशन्ति वदने मृगा ॥

उद्योगिन पुरुषसिहमुपैति लक्ष्मी
दैवेन देयमिति कापुरुषा वदन्ति ।
दैव निहत्य कुरु पौरुषमात्मशक्त्या
यत्ने कृते यदि न सिध्यति कोऽत्र दोष ॥

य काकिणी(३)मप्यपथ प्रपन्ना
निषेवते निष्क सहस्र तुल्या (४)
कालेषु कोटिष्वपि मुक्तहस्त
स्त राजसिह न जहाति लक्ष्मी ॥

(१) Desiring his own good or prosperity
(२) Staunch in friendship
(३) A couri used as a coin
(४) Regards like a thousand of gold coins

जलविन्दु-निपातेन क्रमश पूर्य्यते घट ।
स हेतु सर्व्वविद्याना धर्म्मस्य च धनस्य च ॥
इन्द्रियाणि च सयम्य बकवत् पण्डितो नर ।
देश-काल-बल ज्ञात्वा सर्व्व-कार्य्याणि साधयेत् ॥
अव्यापार परार्थेषु नित्योद्योग स्वकर्म्मसु ।
रक्षण समुपात्तानां (१) एतद्वैभवलक्षण ॥
क्षिप्रमायमनालोच्य व्ययमान स्ववाञ्छया ।
परीक्षीयत एवासौ धनी वैश्रवणोपम (२) ॥
अवस्थानुगता चेष्टा समयानुगता क्रिया ।
तस्मादवस्था समय वीक्ष्य कर्म्म समाचरेत् ॥

---

(१) Duly earned

(२) Like Kuvera, the god of wealth

सिंहशृगालयोः ।

कस्मिंश्चित् वनप्रदेशे खरनखरो नाम सिंहः प्रतिवसति स्म। स कदाचित् इतस्ततः परिभ्रमन् क्षुत्क्षामकण्ठो (१) न किञ्चिद् अपि सत्त्वम् आससाद। ततश्च अस्तमनसमये स महतीं गिरिगुहाम् आसाद्य तस्यां प्रविष्टः चिन्तयामास नूनम् एतस्यां गुहायां रात्रौ केनापि सत्त्वेनागन्तव्यम्। तत् निभृतो (२) भूत्वा तिष्ठामि। एतस्मिन्नन्तरे गुहास्वामी दधिपुच्छो नाम शृगालः समायातः। स च अपश्यत् सिंहपदपङ्क्तिर् (३) गुहायां प्रविष्टा न निष्क्रमणं गता (४)। ततश्च सो ऽचिन्तयत् अहो विनष्टो ऽस्मि नूनम् अस्याम् अन्तर्गतेन सिंहेन भाव्यम्। तत् किं करोमि कथं ज्ञास्यामि।

एवं विचिन्त्य दधिपुच्छो द्वारस्थः फुत्कर्तुम् (५) आरेभे। अहो बिल अहो बिल इत्युक्त्वा तूष्णींभूय स भूयो ऽभाषत भोः किं न स्मरसि यत् मया त्वया सह समयः कृतो ऽस्ति मया बाह्यात् समागतेन त्वं वक्तव्यः त्वया च अहम् आकार-

---

(१) क्षुत्क्षामकण्ठः अर्थ क्षुधया क्षामः क्षीणः कण्ठो ऽस्य। Thin or hollow throughhunger

(२) निभृतः अन्यैरलक्षितः। Secret to others unobserved

(३) सिंहस्य पदानि तेषां पङ्क्तिः। A line of the foot prints of a lion

(४) निष्क्रमणं गता बहिर्गता। Came out

(५) फुत्कर्तुम् आह्वातुम्। To call out

णीय (१)। तद् यदि मां नाह्वयसि ततो ऽहं द्वितीयं बिलं यास्यामि।

तच्छ्रुत्वा सिंहश् चिन्तितवान् नूनम् एषा गुहा अस्य समागतस्य सदा समाह्वानं करोति। परम् अद्य मद्भयात् न किञ्चिद् ब्रूते। तद् अहम् अस्याह्वानं करोमि येन तदनुसारेण प्रविष्टो ऽयं मे भोज्यतां याति। एवं सम्प्रधार्य (२) सिंहस् तस्य आह्वानम् अकरोत्। अथ सिंहशब्देन सा गुहा प्रतिरवपूर्णा अन्यान् अपि दूरस्थान् आरण्यजीवान् त्रासयामास। शृगालो ऽपि पलायमान इमं श्लोकम् अपठत्

अनागतं यः कुरुते स शोभते
स शोच्यते यो न करोत्यनागतम्।
वने ऽत्र संस्थस्य समागता जरा
बिलस्य वाणी न कदापि मे श्रुता (३)॥

---

(१) आकारणीय आह्वातव्य। To be called in (or welcomed)

(२) सम्प्रधार्य स्थिरीकृत्य। Thus resolved

(३) यः पुरुष अनागतम् अनुपस्थित सम्भावितमिति यावत् कुरुते सम्भावितस्य अनिष्टस्य प्रतिकारं विदधाति स शोभते निर्विघ्नेन कालम् अतिवाहयति इत्यर्थ। यः अनागतं न करोति सम्भावितस्य अनिष्टस्य प्रतिकारं न विदधाति स शोच्यते अस्मिन् इति शेष विपदि पतितो बन्धूनां शोकहेतु भवति इत्यर्थ। अत्र अस्मिन् वने संस्थस्य स्थितस्य मम जरा समागता दीर्घं कालम् अस्मिन् वने वसामि इति भाव बिलस्य गह्वरस्य वाणी महाह्वानरूपा मे मया कदापि न श्रुता।

नीलवर्ण-शृगाल-कथा।

कस्मिंश्चिद्वने चण्डरवो नाम शृगालः प्रतिवसति स्म। स कदाचित् क्षुधाविष्टो नगरान्तरे प्रविष्टः। अथ नगरवासिनः सारमेया अवलोक्य तं तीक्ष्णदंष्ट्राग्रैः भक्षयितुमारब्धवन्तः। स प्राणभयात् पलायमानः प्रत्यासन्नं रजकगृहं प्रविष्टः। तत्र नीलीरसपूर्णं(१) महाभाण्डं सज्जीकृतमासीत्। स तस्मिन् पपात। अथ तस्मान्निष्क्रान्तो नीलीवर्णः सञ्जातः। ततः सर्व्वे ते सारमेयाः तं शृगालमजानन्तो यथाभीष्टां दिशं जग्मुः। चण्डरवोऽपि तदनन्तरम्(२) आसाद्य काननाभिमुखं प्रतस्थे।

अथ तदपूर्व्वं सत्त्वमवलोक्य सर्व्वे सिंहव्याघ्रवृक-(३) प्रभृतयोऽरण्यनिवासिनो भयव्याकुलमानसाः समन्तात् पलायनक्रियां कुर्व्वन्ति स्म कथयन्ति स्म च अहो अपूर्व्वमेतत् सत्त्वं कुतोऽप्यागतम्। न विज्ञायते कीदृगस्य चेष्टितं पौरुषञ्च। तद्दूरतरं गच्छामः।

चण्डरवस्तु तान् भयव्याकुलितान् विज्ञाय इत्थम् आह

---

(१) नीली एव रसः तेन पूर्णम्। Filled with indigo juice

(२) अन्तरम् अवकाशम्। Interval

(३) वृकः क्षुद्रकायो व्याघ्रजातिविशेषः। Wolf

भो भो श्वापदाः (१) किं यूयं मां दृष्ट्वा सन्त्रस्ता व्रजथ। न भेतव्यं न भेतव्यम्। अहमद्य ब्रह्मणा स्वयमेव आहूयाभिहितः यत् श्वापदानां मध्ये कश्चित् राजा नास्ति। त्वं मयाद्य श्वापदराज्येऽभिषिक्तः। अतो गत्वा क्षितितले तान् सर्व्वान् परिपालय। ततोऽहमत्रागतः। अहं ककुद्रुमो नाम त्रैलोक्ये श्वापदराजः सञ्जातः।

तच्छ्रुत्वा ते श्वापदाः सिंहपुरःसराः (२) स्वामिन् प्रभो समादिशेति वदन्तस्तं परिवव्रुः (३)।

ततस्तेन सिंहाय अमात्यपदवी प्रदत्ता व्याघ्राय शय्यापालत्वम्, द्वीपिने ताम्बूलाधिकारः, करिणे प्रतीहारित्वम्, (४) वानराय छत्रधरत्वम्। आत्मीयजात्या तैः सह आलापमात्रमपि न करोति। शृगालाः सर्व्वे अर्द्धचन्द्रं दत्त्वा निःसारिताः।

एवं स राजक्रियायां वर्त्तते। ते च सिंहादयो मृगान् व्यापाद्य तस्य पुरः प्रक्षिपन्ति। सोऽपि प्रभुधर्म्मेण (५) सर्व्वेषां (६) विभज्य प्रयच्छति।

---

(१) श्वापदाः हिंस्रजन्तवः। Wild beasts Beasts of prey

(२) सिंहपुरःसराः सिंहप्रमुखाः। Headed by the lion

(३) परिवव्रुः वेष्टितवन्तः। Surrounded

(४) प्रतिहारित्वं द्वारपालत्वम्। The post of a warder or porter

(५) प्रभुधर्म्मेण राजधर्म्मेण राजधर्म्मानुसारेणेति यावत्। In accordance with the duties of a king

(६) सर्व्वेषां सर्व्वेभ्यः। सम्बन्धविवक्षया षष्ठी। Among all of them

एवं गच्छति काले कदाचित् तेन समागतेन दूरदेशे शब्दायमानस्य शृगालवृन्दस्य (१) कोलाहलो ऽश्रावि। तं शब्दं श्रुत्वा पुलकिततनुः आनन्दपरिपूर्णः उत्थाय स तारस्वरेण (२) विरोतुमारब्धवान्।

अथ ते तस्य स्वरमाकर्ण्य शृगालो ऽयमिति ज्ञात्वा सलज्जम् अधोमुखाः क्षणमेकं स्थिताः। ततो मिथः (३) प्रोचुः भो वाहिता (४) वयम् अनेन क्षुद्रशृगालेन। तद्वध्यतां वध्यतामयम्। सोऽपि तदाकर्ण्य पलायितुमिच्छन् सिंहादिभिः खण्डशः कृतः।

नीति — यः स्वभावो (५) हि यस्य स्यात् तस्यासौ दुरतिक्रमः (६)।
श्वा यदि क्रियते राजा स किं नाश्नात्युपानहम् (७)॥

समाप्तम्।

---

(१) शृगालवृन्दस्य शृगालसमूहस्य। Of the jackals

(२) तारस्वरेण उच्चस्वरेण। Aloud

(३) मिथः रहसि शृगालस्य परोक्षमित्यर्थः। In secret, aside

(४) वाहिताः भृत्यभावेन कर्म कारिताः। Made to work as servants, lorded it over

(५) Innate nature, inborn nature

(६) Difficult to give up or overcome

(७) Shoes